International Journal of Sanskrit Research 2020; 6(5): 17-19

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 17-19
© 2020 IJSR
www.anantaajournal.com
Received: 03-07-2020
Accepted: 17-08-2020

**डॉ० चन्द्र कृष्ण मिश्रः**
आचार्य द्वय - वेद (शुक्लयजुर्वेद)
साहित्याचार्यः, ग्राम + पो० - गोई मिश्र लगमा, भाया – धनश्यामपुर, जिला – दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ० चन्द्र कृष्ण मिश्रः**
आचार्य द्वय - वेद (शुक्लयजुर्वेद)
साहित्याचार्यः, ग्राम + पो० - गोई मिश्र लगमा, भाया – धनश्यामपुर, जिला – दरभंगा, बिहार, भारत

# वेदपदार्थानुशीलनम्

**डॉ० चन्द्र कृष्ण मिश्रः**

**DOI:** https://doi.org/10.22271/23947519.2020.v6.i5a.1086

**प्रस्तावना**

वेदार्थचिन्तन विषये निरूक्ताचार्याः यास्काः ब्रुवते स्थाणुरयं भारहरः किलाभूदधीत्य वेदं न विजानीति योऽर्थम् । योऽर्थज्ञ इत् सकलं भद्रम श्रुते नाकमेति ज्ञानविधूतपाप्मा ॥ इत्या दिना ।अस्यामर्थः यस्तु वेदमधीत्यार्थं न विजानाति, सो यं पुमान् भारमेव हरति – धारयति । स्थाणुरिति दृष्टान्तः, छिन्नशाखं शुष्कं वृक्षमूलं स्थाणुशब्देनोच्यते, स च यथा इन्धनार्थमेवोपयुज्यते, न तु पुष्पफलार्थं तथा केवलपाठकस्य व्रात्यत्वं न भवतीत्येतावदेव, न हयनुष्ठानं स्वर्गादिफलसिद्धिर्वास्ति । किलेत्यनेन लोकप्रसिद्धिर्धोत्यते । लोकेपि पाठकस्य यावती पूजा, प्रतिष्ठा च ततोप्यधिका विदुषि दृश्यते इत्यर्थः । यद्वा स्थाणुः – वृक्षः, स यथा पत्रपुष्प – फलानामात्मीयानां धारणमात्रेणेव सम्बध्यते, न तज्जैर्गन्धर सरूप स्पर्शोपभोगसुखेः ।एवं यो वेदमधीत्यार्थ न जानाति, सो सो वेदा ध्ययनभारमात्रमेव बिभर्ति । यद्वा स्थाणुः – गर्दभः, स यथा चन्दनभारं वहति, न तदुपभोगेन सम्बध्यते, एवमर्थान –भिज्ञोपि खरवन्मूढ़ एव वेदितव्यः । तदुक्तम् ----------

यथा खरश्चन्दनभारवाही, भारस्य वेत्ता न तु चन्दनस्य ।
एवं हि शास्त्राणि बहून्यधीत्य चार्थेषु मूढ़ाः खरवद्वहन्ति ॥ इति

यो वेदार्थं जानाति, सोयमिहलो के सकलं पूज्यत्वा दिलक्षणं श्रेयः प्राप्नोति, तथा तेन ज्ञानेन पापक्षये सति मृतः स्वर्ग प्राप्नोतीत्यनेन योऽर्थज्ञः इत्यर्थेन वेदार्थज्ञानं प्रशत्यते ।

एवं यदगृहीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्जवलति कर्हिचित् ॥ [2] इति

अयमर्थः - यद्वेदमन्त्रादिकमाचार्याद् गृहीतं, अविज्ञातं –अर्थज्ञानरहितं, निगदेनैव – पाठरूपेणैव शब्द्यते पुनः पुनरूधार्यते, तत्कदाचिदपि न ज्वलति – न प्रकाशयति – स्वाभीष्टं न साधयति, यथा अनग्नौ – अग्निरहितप्रदेशे प्रक्षिप्तं शुष्कं काष्ठं न ज्वलति, व्यर्थान् प्रकाशयति – न शैत्यं निवारयतीत्यर्थः ।
अपि च ज्ञानार्थस्य लाभार्थस्य वा विदधातोरेव रूपं वेद इति, अलौकिकं पुरूषार्थोपायं वेत्त्यनेनेतिवेदशब्दनिर्वचनं चेति ज्ञापयति – रहस्यार्थज्ञानयुक्तवेदस्यैव मुख्यवेदत्वम् । तथा चोक्तम् --------

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुद्धयते ।
एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥ इति स्मृतौ ।

तस्मादर्थज्ञानरहितस्य पाठमात्रस्य वेदस्य वेदत्वमेव मुख्यं न स्यात्। अतो मुख्यवेदत्वसिद्धये ज्ञातव्य एव तदर्थः। तथा चाम्नायते --

उत त्वं सख्ये स्थिरपीतमाहुर्नेन हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥ इति

अस्यायमर्थः – उत – अपि च, त्व – एकं किंचित् –चतुर्दशविद्यास्थानकुशलं पुरूषं वेदरूपाया वाचः सख्ये स्थित्वा, स्थिरपीतं – स्थैर्येण वेदोक्तार्थामृतपानयुक्तमाहुः – अभिज्ञाः कथयन्ति । सखिविदं सखायाम् 2 इति मन्त्रेण वेदस्य सखित्वमुदाहृतम् । यद्वा स्वर्गलोके देवानां सख्ये स्थित्वातिशयेन पीतामृतमाहुः । किं कथयन्ति ते १ इत्यत आह – वाचां इनाः – ईश्वराः,

सभासु प्रगल्भा वा पण्डिताः वाजिनाः । तेषु मध्ये प्येनं – वेदार्थकुशलं शास्त्रार्थे परा –भवितुं, यद्वा तं – विधेहि मया साकं शास्त्रार्थमि'' त्येवं चोदयितुं न हिन्वन्ति – न कोऽपि प्राप्नुवन्ति, तेन सह विवदितुमसमर्थत्वात् । यस्तु अन्यः कश्चित् पाठमात्र –परः पुष्पफलरहितां वाचं शुश्रुवान् भवति । पूर्वकाण्डोक्तस्य धर्मस्य ज्ञानं पुष्पम् ।उत्तर काण्डोक्तस्य ब्रहमणो ज्ञानं फलम् ।यथा लोके पुष्पं फलस्योत्पादकम् । तथा वेदानुवचनादिजन्यधर्मज्ञानमनुष्ठाद्वारा फलात्मकब्रहमज्ञानेच्छां जनयति ।'' तमेतं वेदा –नुवचनेन ब्राहमणा विविदिषन्ति यज्ञेन दानेन तपसानाराकेन ।'' इति श्रुतेः। यथा च फलं तृप्तिहेतुः ------- तथा ब्रहमज्ञानं कृतकृत्यत्वहेतुः ।'' यत्पूर्णानन्दैकबोधस्तदब्रह्माहमस्मीति कृतकृत्यो भवति । इति श्रुतेः । तादृशपुष्पफललाभरहितवेदपाठकःस एष पुमान् अधेन्वा मायया सह चरति, तया क्षीरं प्राप्तुं यतते इत्यर्थः, नवप्रसूतिका क्षीरदोग्ध्री गौः प्रीतिहेतुत्वात् धिनोतीतिव्युत्पत्त्या धेनुरित्युच्यते । पाठमात्रपरं प्रति वेदरूप वाक् धर्मब्रहमज्ञानरूपं क्षीरं न दोग्धीत्यधेनुः, अत एवासौ माया कपटरूपा ऐन्द्रजालिकनिर्मितगो सदृशारूपत्वात्, तया मायया सह चरन् प्रयतन्नयं परमपुरूषार्थं न लभते इत्यर्थः ।

अथवा उत एव –एकमपि, सख्ये- विदुषां संसदि या सत्कथा – सिद्वद्योपदेशः, सा सखीनां विश्वहितचिन्तकानां कर्मत्वात्सख्यमित्युच्यते, सा च वाचा क्रियते, अतो वाकसम्बन्धात् वाक्सख्ये स्थिरपीतं – पीतं मधु – मधुरं तत्त्वज्ञानं सत्यै कस्यापि हृदये स्थिरं भवति, यद्वा स्थिरपीतं – स्थिरलाभप्राप्ति – माहुः यद्वा तस्मिन् ज्ञातार्थमाहुः, लोके यतो ज्ञातार्थ पुरूषं पीतार्थमिति वदन्ति । किं च एनं विज्ञातार्थ पुरूषं, वाजिनेषु –वाक् – वेदरूपा वाणी, इना –ईश्वरी येषां ते वाजिनाः – अर्थाः, ते खलु वाच आयत्ता भवन्ति । तेषु – वाक् –ज्ञेयेषु अर्थेषु नापि हिन्वन्ति – अपिशब्दोत्रान्वर्थे, केचिदपि नानुगच्छन्ति –नानुगन्तुं शक्नुवन्ति, अयमेवातिशयेन विद्वानिति मत्वा । यद्वा वाजिनेषु –सार-भूतेषु निरूपणीयेष्वर्थेषु एनं न हिन्वन्ति – न बहिष्कुर्वन्ति, किन्तु एनं वेदार्थज्ञं महानुभावं पुरस्कृत्यैव सर्वे वेदार्थ विचारयन्तीत्यर्थः । इत्यर्थज्ञः प्रशस्तोनेन पूर्वा –र्धेन प्रतिपादितः । अनन्तरमुत्त्रार्धेन केवलपाठको निन्द्यते ---- एषः – अविज्ञातार्थः पुरूषः, अधेन्वा – धेनुत्वविवर्जितया कामानामदोग्न्ध्या वाक्प्रतिरूपया मायया चरति – प्रवर्तते । किं कुर्वन् १ अफलामपुष्पां – वाचोर्थः – पुष्पफलं, अर्थज्ञानवर्जितां, यद्वा वाचोर्थः – याज्ञदेवते –यज्ञे भवं ज्ञानं याज्ञं, देवतासु भवं ज्ञानं देवतं, तद्वर्जितां - कर्मादिविषयज्ञानरहितां वाचं – शुश्रुवान् – केवलपाठमात्रेणैव श्रुतवान् स चरति, यथा वंध्या पीना गौः किं द्रोणमात्रं क्षीरं दोग्धि १ इति मायां भ्रान्तिमुत्पाद –यन्ती चरति, यथा वन्ध्योवृक्षः काले पल्लवादियुक्तः सन् पुष्पति फलतीति भ्रान्ति – मुत्पादयैस्तिष्ठति, तथा पाठमात्रं प्रबुवाणश्चरतीत्यर्थः ।

यद्वा सख्ये – देवसख्ये – देवानां समानख्यानतायां देव –सायुज्ये इत्यर्थः । यदाह यास्कः - '' यां यां देवतां निराह तस्यास्तस्यास्ताद् भाव्यमनुभवति'' । इति । अथवा देवसख्ये – यस्मिन् देवानां सखिभावः – प्रेमविशेषःतददेवसख्यं रमणीयं स्थानं, तस्मिन् देवलोके इत्यर्थः । स्थिरपीतं आपीतार्थ –गृहीतार्थ स्थिरं – अविचालिनमाहुः । किं च एनं – विज्ञातार्थं, पुरूषं, वाजिनेषु –वाग्भिः प्रतिपादनीयेषु अर्थेषु न हिन्वन्ति – न तस्यान्ये समत्वं लभन्ते – अर्थात् सएव यथा तानर्थान् व्याकर्तु शक्नोति, नेतरे मन्दबुद्वयो बहवोपि समागताः तथा शक्नुवन्ति तानर्थान् व्याकर्तु मानसौ व्याकरोति। एवं तावदत्र्यर्थज्ञोऽभिष्टुतः।अथेदानीमविद्वानुत्तरेणाद्धचेन निन्द्यते – अधेन्वा हि एष चरति – न हि सा वाक् धिनोति – इष्टं फलं समर्पयति इह – लोके, न च परत्र लोके, यस्या अर्थो न परि –ज्ञायते । तया गृहीत इव तामधीयान् इतश्चेतश्चरति – पयर्यटति, परन्तु स एष कपट-रूपया माययैव चरति।यथा हि कश्चित् मायया कल्पितं सुवर्णं बिभृखात्, एवमयंवाचमेतामर्थज्ञानवर्जितामेवं बिभर्ति, सा तादृशी भ्रियामाणा वाक् किं करोति १नास्मै कामान् दुग्धे, कतमान् १ ये तस्या वाचो दोग्धव्याःसन्ति, तान् । अध्यय – नादृते नान्यदस्ति वाचि किंचिदर्थजातं मृग्यमिति दुराग्रहेण गृहीत्वा योवस्थितो भवति, स खलु अफलामपुष्पामेव वाचं शुश्रुवान् – श्रुतवान् भवति।

अर्थो हि वाचःपुष्पफलम्। कः पुनरसावर्थः१ इति याज्ञं दैवतमध्यात्ममित्येष वाचः समासतोर्थः ।

स पुनरेष रूपकल्पनया पुष्पफलविभागेन द्विधा प्रविभज्यते – याज्ञदैवते पुष्पफले, देवताध्यात्मे वा इति । यज्ञपरिज्ञानं याज्ञम्, देवतापरिज्ञानं दैवतम् । आत्मन्यधि यत्तत्त्वपरिज्ञानं वर्तते तदध्यात्ममित्युच्यते । स एष सर्वोपि मन्त्रब्राहमण भागलक्षणवेदराशिरेवं त्रेधा विभक्तः । तत्रैवं सति यदाभ्युदयलक्षणो धर्मोभिप्रेयते, तदा याज्ञं पुष्पं दैवतं फलम् । किं कारणम् १ पूर्व हि पुष्पं भवति ।

फलार्थम्, याज्ञमपि च पूर्व तन्यते देवतार्थम्, इत्येतस्मात्सामान्यात् याज्ञं पुष्पं, दैवतं फलम् । यदा पुनर्निः श्रेय सलक्षणो धर्मोऽभिप्रेयते, तदोभे अपि याज्ञदैवते पुष्पत्वमेवबिभृतः । दैवते हि याज्ञमन्र्भूतमेव तदर्थत्वात्, अतो न पृथगुच्यते । यत्पुनरेतदधिदैवतं सर्वमपि अदैतज्ञानेनापासकेन मुमुक्षुणा निरूप्य चेतसा आत्मानमेव प्रत्यभिसम्पाद्यते, कार्य-कारणाधिदेवतोप संहारद्वारा, सोयमेवमधिदैवतयज्ञं चोच्छिद्याध्यात्ममेवाभिसम्पादयति,यथा पुष्पभावमुच्छिद्य पुष्पं फलभावायेति । एवं सोयं श्रेयान् आत्मयाज्येवा –भिसम्पद्यते । तत्रैवं सति अध्यात्मार्थत्वादधिदैवतस्य, अध्यात्मस्य च पुरूषार्थस्य निष्पन्नत्वादयं तत्त्वज्ञानवान् कृतकृत्यो भवति, अतो दैवतं पुष्पं, अध्यात्मं फलमित्येवमुक्तम्। इयमृक् निरूक्ते यास्कोप्युदाजहार । तेनानयापि ज्ञानस्तुल्यज्ञानिन्दोदाहरणं प्रपंचितम् ।तस्मात् वेदाध्ययनवत्'' यत्स्तूयते तद्विधीयते'' इति न्यायेनार्थस्यापि विधिरभ्युपगन्तव्य ।अतएव व्याकरणमहाभाष्यकाराः'' वेदोऽध्येयो ज्ञेयश्च'' इत्यनेन तदर्थविधिं स्पष्टं प्रदर्शयामासुरिति ।

इत्थं स्मृतिपुराणादिषु महर्षयोप्याहुः---------
वेदस्याध्ययनं सर्व धर्मशास्त्रस्य चापि यत् ।
अजानतोर्थं तत्सर्वं तुषाणां कण्डनं यथा ॥

तुषावहननवदवृथाप्रयास इत्यर्थः ।

पाठमात्ररतान् वेदे द्विजातीश्चार्थवर्जितान् ।
पशूनिव हि तान् प्राज्ञो वाङ् मात्रेणापि नार्चयेत् ॥

इति वेदार्थनिभिज्ञानां तेषां पूजनमपि न कार्यमतोर्थज्ञान –मावश्यकमित्यभिप्रायः । '' वेदशास्त्रार्थतत्त्वज्ञो यत्र कुत्राश्रमे वसेत् । इहैव लोके तिष्ठन् स ब्रहमभूयाय कल्पते । इत्यर्थज्ञानसम्पन्नस्य महापुरूषस्य महत्फलमाह । वेदार्थपरिज्ञाने दोषमाह ------------------

''न वेदपाठमात्रेण सन्तुष्टः स्यात् द्विजोत्तमः ।
पाठमात्रवसायी तु पंके गौरिव सीदति ।
योऽधीत्यविधिवद्विप्रो न वेदार्थं विचारयेत् ।
स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते ।''2

इति वेदार्थज्ञानाभावे प्रत्यवायश्रवणात्तत्सत्त्वे चाभ्युदय – सम्भवादर्थज्ञानमावश्यकमिति सिद्धम् ।

तथा च यो वेदमन्त्रानध्येति, तदर्थं च न जानाति, स खलु निन्द्यते । योध्येति च तदर्थं जानाति च स प्रशस्यते ।'' ब्राहमणेषु च वेदज्ञो हयर्थज्ञो हयधिकस्ततः । 3 इति भागवते स्मरणात् । न च निन्दितस्याचरणं प्रशस्तस्य चानाचरणं युक्तम् । पातित्यप्र संगात् । अतः आस्तिकैः श्रद्वालुभिः सर्वैरपि'' वयम – निन्द्याः प्रशास्याश्च स्याम'' इति विभाव्य वेदमन्त्रा यथावदर्थज्ञानपूर्वकमेवोच्चारयितव्याः श्रोतव्याश्चेति दिक् ।

**सन्दर्भ**


1. निरुक्तम् – 1/8
2. सुश्रुत संहिता-
3. ऋग्वेद- 10/71/5
4. तै०आ०-2/11
5. बृहदारण्य-4/4/22
6. मनु०-12/102
7. कूर्मपुराणम्-2/87-88
8. भागवत महापुराणम्-
9. शु०य० संहिता
10. का०श्रौ०सू०
11. ऋग्वेद भाष्य भूमिका (सायण)